# shrI shiva pUjA

# શ્રીશિવપૂજા

## Document Information

Text title : shivapUjAvidhi

File name : shivapuja.itx

Category : pUjA, shiva

Location : doc_shiva

Author : S. A. Bhandarkar achkumg3@batelco.com.bh

Transliterated by : Sowmya Ramkumar ramkumar at batelco.com.bh

Proofread by : Sowmya Ramkumar, Sowmya Ramkumar

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# shrI shiva pUjA

# શ્રીશિવપૂજા

બહુ ધાન્ય નામ સંવત્સરે ઉત્તરાયણે શિશિર ઋતૌ માઘ  માસે
કૃષ્ણ પક્ષે ત્રયોદશી તિથૌ ઉત્તરાષાડા નક્ષત્રે રવિ વાસરે

---

1 At the regular Altar

ૐ સર્વેભ્યો ગુરુભ્યો નમઃ ।
ૐ સર્વેભ્યો દેવેભ્યો નમઃ ।
ૐ સર્વેભ્યો બ્રાહ્મણેભ્યો નમઃ ॥

પ્રારમ્ભ કાર્યં નિર્વિઘ્નમસ્તુ । શુભં શોભનમસ્તુ ।
ઇષ્ટ દેવતા કુલદેવતા સુપ્રસન્ના વરદા ભવતુ ॥

અનુજ્ઞાં દેહિ ॥

---

at the shiva Altar

૨ આચમનઃ

(Sip one spoon of water after each mantra)

ૐ કેશવાય સ્વાહા । ૐ નારાયણાય સ્વાહા ।
ૐ માધવાય સ્વાહા ।

(Now we chant the 21 names of the Lord, in
order to concentrate on the Lord)

ૐ ગોવિંદાય નમઃ । ૐ વિષ્ણવે નમઃ ।
ૐ મધુસૂદનાય નમઃ । ૐ ત્રિવિક્રમાય નમઃ ।
ૐ વામનાય નમઃ । ૐ શ્રીધરાય નમઃ ।
ૐ હૃષીકેશાય નમઃ । ૐ પદ્મનાભાય નમઃ ।
ૐ દામોદરાય નમઃ । ૐ સઙ્કર્ષણાય નમઃ ।

ૐ વાસુદેવાય નમઃ । ૐ પ્રદ્યુમ્નાય નમઃ ।
ૐ અનિરુદ્ધાય નમઃ । ૐ પુરુષોત્તમાય નમઃ ।
ૐ અધોક્ષજાય નમઃ । ૐ નારસિંહાય નમઃ ।
ૐ અચ્યુતાય નમઃ । ૐ જનાર્દનાય નમઃ ।
ૐ ઉપેંદ્રાય નમઃ । ૐ હરયે નમઃ ।
શ્રી કૃષ્ણાય નમઃ ॥

---

૩ પ્રાણાયામઃ

ૐ પ્રણવસ્ય પરબ્રહ્મ ઋષિઃ । પરમાત્મા દેવતા ।
દૈવી ગાયત્રી છન્દઃ । પ્રાણાયામે વિનિયોગઃ ॥

ૐ ભૂઃ । ૐ ભુવઃ । ૐ સ્વઃ । ૐ મહઃ ।
ૐ જનઃ । ૐ તપઃ । ૐ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહી
ધિયો યો નઃ પ્રચોદયાત્ ॥

પુનરાચમન
(Repeat Achamana 2 - given above)
ૐ આપોજ્યોતિ રસોમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ્ ॥

(Apply water to eyes and understand that you are of the nature of Brahman)

---

૪ સઙ્કલ્પઃ

ૐ શ્રીમાન્ મહાગણાધિપતયે નમઃ ।

શ્રી ગુરુભ્યો નમઃ । શ્રી સરસ્વત્યૈ નમઃ ।
શ્રી વેદાય નમઃ । શ્રી વેદપુરુષાય નમઃ ।
ઇષ્ટદેવતાભ્યો નમઃ ।
(Prostrations to your favorite deity)
કુલદેવતાભ્યો નમઃ ।
(Prostrations to your family deity)
સ્થાનદેવતાભ્યો નમઃ ।

(Prostrations to the deity of this house)

ગ્રામદેવતાભ્યો નમઃ ।

(Prostrations to the deity of this place)

વાસ્તુદેવતાભ્યો નમઃ ।

(Prostrations to the deity of all the materials we have collected)

શચીપુરંદરાભ્યાં નમઃ ।

(Prostrations to the Indra and shachI)

ઉમામહેશ્વરાભ્યાં નમઃ ।

(Prostrations to Shiva and pArvati)

માતાપિતૃભ્યાં નમઃ ।

(Prostrations to our parents)

લક્ષ્મીનારાયણાભ્યાં નમઃ ।

(Prostrations to the Lords who protect us - LakShmi and NArAyaNa)

સર્વેભ્યો દેવેભ્યો નમો નમઃ ।

(Prostrations to all the Gods)

સર્વેભ્યો બ્રાહ્મણેભ્યો નમો નમઃ ।

(Prostrations to all Brahamanas - those who are in the religious path)

યેતદ્કર્મપ્રધાન દેવતાભ્યો નમો નમઃ ।

(Prostrations to Lord Shiva, the main deity if this puja)

॥ અવિઘ્નમસ્તુ ॥

સુમુખશ્ચ એકદંતશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નનાશો ગણાધિપઃ ॥

ધૂમ્રકેતુર્ગણાધ્યક્ષો બાલચન્દ્રો ગજાનનઃ ।
દ્વાદશૈતાનિ નામાનિ યઃ પઠેત્ શ્રુણુયાદપિ ॥

વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ।
સંગ્રામે સङ્કટેશ્ચૈવ વિઘ્નઃ તસ્ય ન જાયતે ॥

(Whoever chants or hears these 12 names of Lord
Ganesha will not have any obstacles in all their
endeavours)

શુક્લામ્બરધરં દેવં શશિવર્ણં ચતુર્ભુજમ્ ।

પ્રસન્નવદનં ધ્યાયેત્ સર્વ વિઘ્નોપશાંતયે ॥

સર્વમઙ્ગલ માઙ્ગલ્યે શિવે સર્વાર્થ સાધિકે ।
શરણ્યે ત્ર્યમ્બકે દેવી નારાયણી નમોઽસ્તુતે ॥

(We completely surrender ourselves to that Goddess who embodies auspiciousness, who is full of auspiciousness and who brings auspicousness to us)

સર્વદા સર્વ કાર્યેષુ નાસ્તિ તેષાં અમઙ્ગલમ્ ।
યેષાં હૃદિસ્થો ભગવાન્ મઙ્ગલાયતનો હરિઃ ॥

(When Lord Hari, who brings auspiciousness is situated in our hearts, then there will be no more inauspiciousness in any of our undertakings)

તદેવ લગ્નં સુદિનં તદેવ તારાબલં ચંદ્રબલં તદેવ ।
વિદ્યા બલં દૈવબલં તદેવ લક્ષ્મીપતેઃ તેંઘ્રિઽયુગં સ્મરામિ ॥

(What is the best time to worship the Lord? When our hearts are at the feet of Lord Narayana, then the strength of the stars, the moon, the strength of knowledge and all the Gods will combine and make it the most auspicious time and day to worship the Lord)

લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાજયઃ ।
યેષાં ઇન્દીવર શ્યામો હૃદયસ્થો જનાર્દનઃ ॥

(When the Lord is situated in a person's heart, he will always have profit in his work and victory in all that he takes up and there is no question of defeat for such a person)

વિનાયકં ગુરું ભાનું બ્રહ્માવિષ્ણુમહેશ્વરાન્ ।
સરસ્વતીં પ્રણમ્યાદૌ સર્વ કાર્યાર્થ સિદ્ધયે ॥

(To achieve success in our work and to find fulfillment we should first offer our prayers to Lord Vinayaka and then to our teacher, then

to the Sun God and to the holy trinity of Brahma,
ViShNu and Shiva)

શ્રીમદ્ ભગવતો મહાપુરુષસ્ય વિષ્ણોરાજ્ઞાય પ્રવર્તમાનસ્ય
અદ્ય બ્રહ્મણોઽદ્વિતીય પરાર્ધે વિષ્ણુપદે શ્રી શ્વેતવરાહ કલ્પે
વૈવસ્વત મન્વન્તરે ભારત વર્ષે ભરત ખંડે જમ્બૂદ્વીપે
દણ્ડકારણ્ય દેશે ગોદાવર્યા દક્ષિણે તીરે કૃષ્ણવેણ્યો ઉત્તરે
તીરે પરશુરામ ક્ષત્રે (સમ્યુક્ત અમેરિકા દેશે St Lewis ગ્રામે
or Australia દેશે Victoria ગ્રામે બહ્રીનુ દેશે)
શાલિવાહન શકે વર્તમાને વ્યવહારિકે બહુ ધાન્ય નામ સંવત્સરે
ઉત્તરાયણે શિશિર ઋતૌ માઘ માસે કૃશ્ણ પક્ષે ત્રયોદસિ તિથૌ
ઉત્તરાશાડ નક્ષત્રે રવિ વાસરે સર્વ ગ્રહેષુ યથા રાશિ સ્થાન
સ્થિતેષુ સત્સુ યેવં ગુણવિશેષેણ વિશિષ્ટાયાં શુભપુણ્યતિથૌ મમ
આત્મન શ્રુતિસ્મૃતિપુરાણોક્ત ફલપ્રાપ્યર્થં મમ સકુટુમ્બસ્ય ક્ષેમ સ્થૈર્ય
આયુરારોગ્ય ચતુર્વિધ પુરુષાર્ત્થ સિધ્યર્થં અંગીકૃત શ્રી શિવરાત્રિ
વ્રતાંગત્વેન સમ્પાદિત સામગ્રય્ય શ્રીગણેશ વરુણ ઇંદ્રાદિ
અષ્ટલોકપાલ ગણપતિ ચતુષ્ટ દેવતા પૂજનપૂર્વકં શ્રી શિવ
પ્રીત્યર્થં યથા શક્ત્યા યથા મિલિતોપચાર દ્રવ્યૈઃ પુરુષસૂક્ત
પુરાણોક્ત મન્ત્રૈશ્ચ ધ્યાનાવાહનાદિ ષોડશોપચારે શ્રી શિવ
પૂજનં કરિષ્યે ॥

ઇદં ફલં મયાદેવ સ્થાપિતં પુરતસ્તવ ।
તેન મે સફલાવાપ્તિર્ ભવેત્ જન્મનિ જન્મનિ ॥

(keep fruits in front of the Lord)

---

૫ શિવ પઞ્ચાક્ષરી ન્યાસ
(touching various parts of the body)

॥ ૐ ॥

અસ્ય શ્રી શિવ પઞ્ચાક્ષરી મન્ત્રસ્ય વામદેવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રી સદાશિવો દેવતા ।
શ્રી સદાશિવ પ્રીત્યર્થે ન્યાસે પૂજને ચ વિનિયોગઃ ॥

વામદેવ ઋષયે નમઃ । શિરસે સ્વાહા ॥

(touch the head)

અનુષ્ટુપ્ છન્દસે નમઃ । મુખે સ્વાહા ॥

(touch face)

શ્રી સદાશિવ દેવતાયૈ નમઃ । લલાટે સ્વાહા ॥

(touch the forehead)

ૐ નં તત્પુરુષાય નમઃ । હૃદયે સ્વાહા ॥

( touch the heart)

ૐ મં અઘોરાય નમઃ । પાદયો સ્વાહા ॥

(touch feet)

ૐ શિં સદ્યોજાતાય નમઃ । ગુહ્યે સ્વાહા ॥

(touch groin)

ૐ વં વામદેવાય નમઃ । મૂર્ધ્નિ સ્વાહા ॥

(touch top of the skull )

ૐ યં ઈશાનાય નમઃ । શ્રોત્રે સ્વાહા ॥

(touch ears)

ૐ ૐ હૃદયાય નમઃ ।
ૐ નં શિરસે સ્વાહા ।
ૐ મં શિખાયૈ વૌષટ્ ।
ૐ શિં કવચાય હુમ્ ।
ૐ વં નેત્રત્રયાય વૌષટ્ ।
ૐ યં અસ્ત્રાય ફટ્ ।

---

૬ દિગ્બન્ધન

( show mudras)

ૐ અઘોરષ્ટ્રેન ઇતિ દિગ્બન્ધઃ । દિશો બદ્ધામિ ॥

---

૭ ગણપતિ પૂજા

આદૌ નિર્વિઘ્નતાસિધ્યર્થં મહા ગણપતિં પૂજનં કરિષ્યે ।
ૐ ગણાનાં ત્વા શૌનકો ગૃત્સમદો ગણપતિર્જગતિ
ગણપત્યાવાહને વિનિયોગઃ ॥

(pour water)

ૐ ગણાનાં ત્વા ગણપતિં આવામહે ।
કવિં કવિનામુપમ શ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત ।
આનઃ શ઼ૃણ્વન્નૂતિભિઃ સીદસાદનમ્ ॥

ભૂઃ ગણપતિં આવાહયામિ ।
ભુવઃ ગણપતિં આવાહયામિ ।
સ્વઃ ગણપતિં આવાહયામિ ।
ૐ ભૂર્ભુવસ્વઃ મહાગણપતયે નમઃ ।
ધ્યાયામિ । ધ્યાનં સમર્પયામિ ।

ૐ મહાગણપતયે નમઃ । આવાહનં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । આસનં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । પાદ્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । અર્ઘ્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । આચમનીયં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । સ્નાનં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । વસ્ત્રં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । યજ્ઞોપવીતં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । ચંદનં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । પરિમલ દ્રવ્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । પુષ્પાણિ સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । ધૂપં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । દીપં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । નૈવેદ્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । તામ્બૂલં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । ફલં સમર્પયામિ ।

ૐ મહાગણપતયે નમઃ । દક્ષિણાં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । આર્તિક્યં સમર્પયામિ ।

ૐ ભૂર્ભુવસ્વઃ મહાગણપતયે નમઃ ।
મન્ત્રપુષ્પં સમર્પયામિ ।
ૐ ભૂર્ભુવસ્વઃ મહાગણપતયે નમઃ ।
પ્રદક્ષિણા નમસ્કારાન્ સમર્પયામિ ।
ૐ ભૂર્ભુવસ્વઃ મહાગણપતયે નમઃ ।
છત્રં સમર્પયામિ ।

ૐ મહાગણપતયે નમઃ । ચામરં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । ગીતં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । નૃત્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । વાદ્યં સમર્પયામિ ।
ૐ મહાગણપતયે નમઃ । સર્વ રાજોપચારાન્ સમર્પયામિ ॥

॥ અથ પ્રાર્થના ॥

ૐ વક્રતુણ્ડ મહાકાય કોટિ સૂર્ય સમપ્રભા ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વ કાર્યેષુ સર્વદા ॥

ૐ ભૂર્ભુવસ્વઃ મહાગણપતયે નમઃ । પ્રાર્થનાં સમર્પયામિ ।

અનયા પૂજયા વિઘ્નહર્તા મહાગણપતિ પ્રીયતામ્ ॥

---

૮ દીપ સ્થાપના

અથ દેવસ્ય વામ ભાગે દીપ સ્થાપનં કરિષ્યે ।
અગ્નિનાગ્નિ સમિધ્યતે કવિર્ગ્રહપતિર્યુવા હવ્યવાત્ જુવાસ્યઃ ॥

(light the lamps)

---

૯ ભૂમિ પ્રાર્થના

મહિદ્યૌ પૃથ્વીચન ઇમં યજ્ઞં મિમિક્ષતાં
પિપ્રતાન્નો ભરીમભિઃ ॥

૧૦ ધાન્ય રાશિ

ૐ ઔષધાય સંવદંતે સોમેન સહરાજ્ઞા ।
યસ્મૈ કૃણેતિ બ્રાહ્મણસ્થં રાજન્ પારયામસિ ॥

(Touch the grains/rice/wheat)

૧૧ કલશ સ્થાપના

ૐ આ કલશેષુ ધાવતિ પવિત્રે પરિસિંચ્યતે
ઉક્તૈર્યજ્ઞેષુ વર્ધતે ॥

(keep kalasha on top of rice pile)
ૐ ઇમં મે ગઙ્ગે યમુને સરસ્વતી શુતુદ્રિસ્તોમં સચતા પરુષ્ણ્ય ।
અસિક્ન્ય મરુદ્વૃધે વિતસ્થયાર્જીકીયે શ્રુણુહ્યા સુષોમય ॥

(fill kalasha with water)
ૐ ગંધદ્વારાં ધુરાદર્શાં નિત્ય પુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીં સર્વ ભૂતાનાં તામિ હોપહ્વયેશ્રિયમ્ ॥

(sprinkle in/apply ga.ndha to kalasha)
ૐ યા ફલિનીર્યા અફલા અપુષ્પાયાશ્ચ પુષ્પાણિ ।
બૃહસ્પતિ પ્રસોતાસ્થાનો મઞ્ચત્વં હસઃ ॥

(put beetle nut in kalasha)
ૐ સહિરત્નાનિ દાશુષેસુવાતિ સવિતા ભગઃ ।
તમ્ભાગં ચિત્રમીમહે ॥

(put jewels / washed coin in kalasha)
ૐ હિરણ્યરૂપઃ હિરણ્ય સન્દ્રિગ્પાન્ન પાત્સ્યેદુ હિરણ્ય વર્ણઃ ।
હિરણ્યયાત્ પરિયોનેર્ નિષદ્યા હિરણ્યદા દદત્યન્ નમસ્મૈ ॥

(put gold / dakShina in kalasha)
ૐ કાણ્ડાત્ કાણ્ડાત્ પરોહંતિ પરુષઃ પરુષઃ પરિ એવાનો દૂર્વે
પ્રતનુ સહસ્રેણ શતેન ચ ॥

(put dUrva / karika )

ૐ અશ્વત્થેવો નિશદનં પર્ણેવો વસતિશ્કૃત ।
ગો ભાજ ઇત્કિલા સથયત્સ નવથ પૂરુષમ્ ॥

(put five leaves in kalasha)
ૐ યા ફલિનીર્યા અફલા અપુષ્પાયાશ્ચ પુષ્પાણિ ।
બૃહસ્પતિ પ્રસોતાસ્થાનો મઞ્ચત્વં હસઃ ॥

(place coconut on kalasha)
ૐ યુવાસુવાસઃ પરીવીતાગાત્ સ ઉશ્રેયાન્ ભવતિ જાયમાનઃ ।
તં ધીરાસઃ કાવયઃ ઉન્નયંતિ સ્વાદ્ધ્યો સ્વાદ્ધ્યો મનસા દેવયંતઃ ॥

(tie cloth for kalasha)
ૐ પૂર્ણાદર્વિ પરાપત સુપૂર્ણા પુનરાપઠ ।
વસ્નેવ વિક્રીણાવઃ ઇષમૂર્જં શતક્રતો ॥

(copper plate and aShTadala with ku.nkuM)

ઇતિ કલશં પ્રતિષ્ઠાપયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૧૨ કલશ પૂજન

(continue with second kalasha)

કલશસ્ય મુખે વિષ્ણુઃ કણ્ઠે રુદ્રઃ સમાશ્રિતઃ ।
મૂલે તત્ર સ્થિતો બ્રહ્મ મધ્યે માતૃગણાઃ સ્મૃતાઃ ॥

કુક્ષૌતુ સાગરાઃ સર્વે સપ્ત દ્વીપા વસુંધરાઃ ।
ઋગ્વેદોથ યજુર્વેદઃ સામવેદોહ્યથર્વણઃ ॥

અંગૈશ્ચ સહિતાઃ સર્વે કલશંતુ સમાશ્રિતાઃ ।
અત્ર ગાયત્રી સાવિત્રી શાંતિ પુષ્ટિકરી તથા ॥

આયાન્તુ દેવ પૂજાર્થં અભિષેકાર્થ સિદ્ધયે ॥

ૐ સિતાસિતે સરિતે યત્ર સંગથે તત્રાપ્લુતા સોદિવમુત્પતંતિ ।
યે વૈતન્વં વિસ્રજન્તિ ધીરાસ્તે જનાસો અમૃતત્ત્વં ભજન્તિ ॥

॥ કલશઃ પ્રાર્થનાઃ ॥

કલશઃ કીર્તિમાયુષ્યં પ્રજ્ઞાં મેધાં શ્રિયં બલમ્ ।
યોગ્યતાં પાપહાનિં ચ પુણ્યં વૃદ્ધિં ચ સાધયેત્ ॥

સર્વ તીર્થમયો યસ્માત્ સર્વ દેવમયો યતઃ ।
અથઃ હરિપ્રિયોઽસિ ત્વં પૂર્ણકુમ્ભં નમોઽસ્તુતે ॥

કલશદેવતાભ્યો નમઃ ।
સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

॥ મુદ્રા ॥

(Show mudras as you chant )

નિર્વીષિ કરણાર્થે તાર્ક્ષ્ મુદ્રા ।
અમૃતિ કરણાર્થે ધેનુ મુદ્રા ।
પવિત્રી કરણાર્થે શઙ્ખ મુદ્રા ।
સંરક્ષણાર્થે ચક્ર મુદ્રા ।
વિપુલમાયા કરણાર્થે મેરુ મુદ્રા ।

---

૧૩ શઙ્ખ પૂજન
(pour water from kalasha to sha.nkha
add ga.ndha flower)

શઙ્ખં ચંદ્રાર્ક દૈવતં મધ્યે વરુણ દેવતામ્ ।
પૃષ્ઠે પ્રજાપતિં વિંદ્યાદ્ અગ્રે ગંગા સરસ્વતીમ્ ॥

ત્વં પુરા સાગરોત્પન્નો વિષ્ણુના વિધૃતઃ કરે ।
નમિતઃ સર્વ દેવૈશ્ચ પાઞ્ચજન્યં નમોઽસ્તુતે ॥

પાઞ્ચજન્યાય વિદ્મહે । પાવમાનાય ધીમહિ ।
તન્નો શઙ્ખઃ પ્રચોદયાત્ ॥

શઙ્ખ દેવતાભ્યો નમઃ ।
સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૧૪ ઘંટાર્ચના

(Pour drops of water from sha.nkha on top of the bell

apply ga.ndha flower)

આગમાર્થન્તુ દેવાનાં ગમનાર્થન્તુ રાક્ષસામ્ ।
કુરુ ઘંટારવં તત્ર દેવતાવાહન લાંછનમ્ ॥

જ્ઞાનથોઽજ્ઞાનતોવાપિ કાંસ્ય ઘંટાન્ નવાદયેત્ ।
રાક્ષસાનાં પિશાચાનાં તદ્દેશે વસતિર્ભવેત્ ।
તસ્માત્ સર્વ પ્રયત્નેન ઘંટાનાદં પ્રકારયેત્ ।

ઘંટા દેવતાભ્યો નમઃ ।
સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

(Ring the gha.nTA)

---

૧૫ આત્મશુદ્ધિ
( Sprinkle water from sha.nkha
on puja items and devotees)

અપવિત્રો પવિત્રો વા સર્વ અવસ્થાંગતોઽપિ વા ।
યઃ સ્મરેત્ પુણ્ડરીકાક્ષં સઃ બાહ્યાભ્યંતરઃ શુચિઃ ॥

---

૧૬ ગોશ‍ૃન્ગ પૂજા

વાયવ્યે અર્ઘ્યમ્ । નૈરૃત્યે પાદ્યમ્ ।
ઈશાન્યે આચમનીયમ્ । આગ્નેયે મધુપર્કમ્ ।
પૂર્વે સ્નાનીયમ્ । પશ્ચિમે પુનરાચમનમ્ ।

---

૧૭ પઞ્ચામૃત પૂજા
( put tulasi leaves or axatAs in vessels )

ક્ષીરે સોમાય નમઃ । (keep milk in the centre)
દધિનિ વાયવે નમઃ । (curd facing east )
ઘૃતે રવયે નમઃ । (Ghee to the south)
મધુનિ સવિત્રે નમઃ । ( Honey to west )
શર્કરાયાં વિશ્વેભ્યો દેવેભ્યો નમઃ । ( Sugar to north)

## ૧૮ દ્વારપાલક પૂજા

પૂર્વદ્વારે દ્વારશ્રિયૈ નમઃ ।
અસિંતાંગ ભૈરવાય નમઃ । રુરુ ભૈરવાય નમઃ ।
દક્ષિણદ્વારે દ્વારશ્રિયૈ નમઃ ।
ચણ્ડ ભૈરવાય નમઃ । ક્રોધ ભૈરવાય નમઃ ।
પશ્ચિમદ્વારે દ્વારશ્રિયૈ નમઃ ।
ઉન્મત્તભૈરવાય નમઃ । કપાલ ભૈરવાય નમઃ ।
ઉત્તરદ્વારે દ્વારશ્રિયૈ નમઃ ।
ભીષણભૈરવાય નમઃ । સંહાર ભૈરવાય નમઃ ।

બ્રહ્મણે નમઃ । વિષ્ણવે નમઃ ।
ગઙ્ગાયૈ નમઃ । ગણપતયે નમઃ ।
ષણ્મુખાય નમઃ । ભૃઙ્ગિનાથાય નમઃ ।
ક્ષેત્રપાલાય નમઃ । ત્રિપુરસંહર્ત્રે નમઃ ।
શાન્તિયે નમઃ । તુષ્ટિયે નમઃ ।
જ્ઞાનાય નમઃ । ધર્માય નમઃ ।
વૈરાગ્યાય નમઃ । વીર્યાય નમઃ ।
સત્યાય નમઃ । અજ્ઞાનાય નમઃ ।
અધર્માય નમઃ । અનૈશ્વર્યાય નમઃ ।
અસત્યાય નમઃ । અવિરાજ્ઞાય નમઃ ।
સત્ત્વાય નમઃ । રજસે નમઃ ।
તમસે નમઃ । માયાય નમઃ ।
પદ્માય નમઃ ॥

દ્વારપાલક પૂજાં સમર્પયામિ ॥

## ૧૯ પીઠ પૂજા

આધાર શક્ત્યૈ નમઃ ॥ મૂલપ્રકૃતે નમઃ ॥

વરાહાય નમઃ ॥ અનન્તાય નમઃ ॥

પદ્માય નમઃ ॥ નાલાય નમઃ ॥

કન્દાય નમઃ ॥ કર્ણિકાય નમઃ ॥

પત્રેભ્યો નમઃ ॥ દલેભ્યો નમઃ ॥

કેસરેભ્યો નમઃ ॥

મધ્યે શ્રી ભવાનિ શંકરાય નમઃ। પીઠ પૂજાં સમર્પયામિ ॥

---

૨૦ ધ્યાનં

ૐ ૐ (repeat 15 times)

ધ્યાયેત્ નિત્યં મહેશં રજતગિરિ નિભિં ચારુ ચન્દ્રાવતંસમ્ ।
રત્નાકલ્પોજ્ જ્વલાંગં પરશુમૃગવરા ભીતિ હસ્તં પ્રસન્નમ્ ॥

પદ્માસીનં સમન્તાત્ સ્તુતમમરગણૈઃ વ્યાઘ્રકૃતિં વસાનમ્ ।
વિશ્વાદ્યં વિશ્વવન્દ્યં નિખિલ ભય હરં પંચ વક્ત્રં ત્રિનેત્રમ્ ॥

શ્રી સામ્બસદાશિવાય નમઃ ।
શ્રી સદાશિવં ધ્યાયામિ ॥

(you can add more related shlokas)

---

૨૧ આવાહન
( hold flowers in hand)

વ્યાઘ્ર ચર્મધરં દેવં ચિતિ ભસ્મનુલેપનમ્ ।
અહ્વાયાં ઉમાકાન્તં નાગાભરણ ભૂષિતમ્ ॥

ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥

આગચ્છ દેવદેવેશ તેજોરાશે જગત્પતે ।
ક્રિયમાણાં મયા પૂજાં ગૃહાણ સુરસત્તમે ॥

ૐ ભૂઃ પુરુષં સામ્બસદાશિવં આવાહયામિ ।
ૐ ભુવઃ પુરુષં સામ્બસદાશિવં આવાહયામિ ।
ૐ સ્વઃ પુરુષં સામ્બસદાશિવં આવાહયામિ ।
ૐ ભૂર્ભુવઃ સ્વઃ સામ્બસદાશિવં આવાહયામિ ॥

(offer flowers to Lord)

ૐ ઉમાકાન્તાય નમઃ । આવાહયામિ ॥

આવાહિતો ભવ । સ્થાપિતો ભવ । સન્નિહિતો ભવ ।
સન્નિરુદ્ધો ભવ । અવકુણ્ઠિથો ભવ । સુપ્રીતો ભવ ।
સુપ્રસન્નો ભવ । સુમુખો ભવ । વરદો ભવ ।
પ્રસીદ પ્રસીદ ॥

(show mudras to Lord)

સ્વામિન્ સર્વ જગન્નાથ યાવત્ પૂજાવસાનકમ્ ।
તાવત્ત્વં પ્રીતિ ભાવેન લિંગેસ્મિન્ સન્નિધો ભવ ॥

---

૨૨ આસનં

પુરુષ એવેદગું સર્વમ્ યદ્ભૂતં યચ્છ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનઃ યદન્નેનાતિરોહતિ ॥

દિવ્ય સિંહાસ નાસીનં ત્રિનેત્રં વૃષવાહનમ્ ।
ઇન્દ્રાદિ દેવનમિતં દદામ્યાસન મુત્તમમ્ ॥

ૐ ગૌરિ ભર્ત્રે નમઃ । આસનં સમર્પયામિ ॥

(offer flowers/axathAs)

---

૨૩ પાદ્યં

(offer water)

એતાવાનસ્ય મહિમા અતો જ્યાયાગુંશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥

ગઙ્ગાદિ સર્વ તીર્થેભ્યો મયા પ્રાર્થનયા હૃતમ્ ।
તોયમે તત્ સુખ સ્પર્શં પાદ્યર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ ગઙ્ગાધરાય નમઃ । પાદોયો પાદ્યં સમર્પયામિ ॥

---

૨૪ અર્ઘ્યં

(offer water)

ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પાદોઽસ્યેહાભવાત્પુનઃ ।
તતો વિશ્વઙ્વ્યક્રામત્ સાશનાનશને અભિ ॥

ગન્ધોદકેન પુષ્પેણ ચન્દનેન સુગન્ધિના ।
અર્ઘ્યં ગૃહાણ દેવેશ ભક્તિં મે અચલાં કુરુ ॥

ૐ વૃષ વાહનાય નમઃ । અર્ઘ્યં સમર્પયામિ ॥

---

૨૫ આચમનીયં
(offer water or akShathA/ leave/flower)

તસ્માદ્વિરાડજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિ મથો પુરઃ ॥

કર્પૂરોક્ષીર સુરભિ શીતલં વિમલં જલમ્ ।
ગઙ્ગાયાસ્તુ સમાનીતં ગૃહાણાચમનીયકમ્ ॥

ૐ સાધ્યો જાતાય નમઃ । આચમનીયં સમર્પયામિ ॥

---

૨૬ મધુપર્કં

નમોઽસ્તુ સર્વલોકેશ ઉમાદેહાર્ધ ધારિણે ।
મધુપર્કો મયા દત્તો ગૃહાણ જગદીશ્વર ॥

ૐ પરમેશ્વરાય નમઃ । મધુપર્કં સમર્પયામિ ॥

---

૨૭ સ્નાનં

યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યમ્ ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ ॥

ગંગાચ યમુનાશ્ચૈવ નર્મદાશ્ચ સરસ્વતિ ।
તાપિ પયોષ્ણિ રેવચ તાભ્યઃ સ્નાનાર્થમાહૃતમ્ ॥

ૐ શ્રી વિશ્વેશ્વરાય નમઃ । મલાપકર્શ સ્નાનં સમર્પયામિ ॥

## ૨૭ ૧. પઞ્ચામૃત સ્નાનં

### ૨૭ ૧.૧ પયઃ સ્નાનં (milk bath)

ૐ આપ્યાય સ્વ સ્વસમેતુતે
વિશ્વતઃ સોમવૃષ્ણ્યં ભવાવાજસ્ય સઙ્ઘે ॥

પયસ્નાનમિદં દેવ ત્રિલોચન વૃષદ્ધ્વજ ।
ગૃહાણ ગૌરીરમણ ત્વદ્ભક્તેન મય્યાર્પિતમ્ ॥

ૐ શમ્ભવે નમઃ । પયઃ સ્નાનં સમર્પયામિ ॥

પયઃ સ્નાનાનંતર શુદ્ધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

### ૨૭ ૧.૨ દધિ સ્નાનં (curd bath)

ૐ દધિક્રાવણો અકારિષં જિષ્ણોરશ્વસ્યવાજિનઃ ।
સુરભિનો મુખાકરત્ પ્રાણ આયુંષિતારિષત્ ॥

દધ્ન ચૈવ મહાદેવ સ્વપ્નં ક્રીયતે મયા ।
ગૃહાણ ત્વં સુરાદીશ સુપ્રસન્નો ભવાવ્યય ॥

ૐ વામદેવાય નમઃ । દધિ સ્નાનં સમર્પયામિ ॥

દધિ સ્નાનાનંતર શુદ્ધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

### ૨૭ ૧.૩ ઘૃત સ્નાનં (ghee bath)

ૐ ઘૃતં મિમિક્ષે ઘૃતમસ્ય યોનિર્ઘૃતે શ્રિતો ઘૃતંવસ્યધામ
અનુષ્ઠધમાવહ માદયસ્વ સ્વાહાકૃતં વૃષભ વક્ષિહવ્યમ્ ॥

સર્પીશ ચ મહારુદ્ર સ્વપ્નં ક્રીયતે દુન ।
ગૃહાણ શ્રદ્ધયા દત્તં તવ પ્રીતાર્થમેવ ચ ॥

ૐ અઘોરાય નમઃ । ઘૃત સ્નાનં સમર્પયામિ ॥

ઘૃત સ્નાનાનંતર શુધ્ધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૧.૪ મધુ સ્નાનં (honey bath)

ૐ મધુવાતા ઋતાયથે મધુક્ષરંતિ સિન્ધવઃ માધ્વિનઃ સંતોષ્વધીઃ
મધુનક્તા મુથોષસો મધુમત્વાર્થિવં રજઃ મધુદ્યૌ રસ્તુનઃ પિતા
મધુમાન્નો વનસ્પતિર્મધુમાં અસ્તુ સૂર્યઃ માધ્વીર્ગાવો ભવંતુનઃ ॥

ઇદં મધુ મયા દત્તં તવ પુષ્ટ્યર્થમેવ ચ ।
ગૃહાણ દેવદેવેશ તતઃ શાન્તિં પ્રયશ્ચ મે ॥

ૐ તત્ પુરુષાય નમઃ । મધુ સ્નાનં સમર્પયામિ ॥

મધુ સ્નાનાનંતર શુધ્ધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૧.૫ શર્કરા સ્નાનં (sugar bath)

ૐ સ્વાદુઃ પવસ્ય દિવ્યાય જન્મને સ્વાદુદરિન્દ્રાય સુહવીતુ નામ્ને ।
સ્વાદુર્મિત્રાય વરુણાય વાયવે બૃહસ્પતયે મધુમા અદાભ્યઃ ॥

સિથયા દેવ દેવેશ સ્નાપનં ક્રીયતે યતઃ ।
તતઃ સંતુષ્ટિમાપન્નઃ પ્રસન્નો વરદો ભવ ॥

ૐ ઈશાનાય નમઃ । શર્કરા સ્નાનં સમર્પયામિ ।
શર્કરા સ્નાનાનંતર શુધ્ધોદક સ્નાનં સમર્પયામિ ।
સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૨. ગંધોદક સ્નાનં (Sandlewood water bath)

ૐ ગંધદ્વારાં દુરાધર્શાં નિત્ય પુષ્પાં કરીષિણીમ્ ।
ઈશ્વરીં સર્વ ભૂતાનાં તામિ હોપ વ્હયેશ્રિયમ્ ॥

હર ચંદન સમ્ભૂતં હર પ્રીતિશ્ચ ગૌરવાત્ ।
સુરભિ પ્રિય પરમેશ ગંધ સ્નાનાય ગૃહ્યતામ્ ॥

ૐ શ્રી નીલકણ્ઠાય નમઃ । ગંધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૩. અભ્યંગ સ્નાનં (Perfumed Oil bath)

ૐ કનિક્રદજ્વનુશં પ્રભ્રુવાન। ઇયર્થિર્વાચમરિતેવ નાવમ્ ।
સુમઙ્ગલશ્ચ શકુને ભવાસિ માત્વા કાચિદભિભાવિશ્વ્યા વિદત ॥

અભ્યંગાર્થં મહીપાલ તૈલં પુષ્પાદિ સમ્ભવમ્ ।
સુગંધ દ્રવ્ય સમ્મિશ્રં સંગૃહાણ જગત્પતે ॥

ૐ ઉમાપતયે નમઃ । અભ્યંગ સ્નાનં સમર્પયામિ।
સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૪. અંગોદ્વર્તનકં (To clean the body)

અંગોદ્વર્તનકં દેવ કસ્તૂર્યાદિ વિમિશ્રિતમ્ ।
લેપનાર્થં ગૃહાણેદં હરિદ્રા કુઙ્કુમૈર્યુતમ્ ॥

ૐ કપર્દિને નમઃ । અંગોદ્વર્તનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૫. ઉષ્ણોદક સ્નાનં (Hot water bath)

નાના તીર્થાદાહૃતં ચ તોયમુષ્ણં મયાકૃતમ્ ।
સ્નાનાર્થં ચ પ્રયશ્ચામિ સ્વીકુરુશ્વ દયાનિધે ॥

ૐ ચન્દ્રશેખરાય નમઃ । ઉષ્ણોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

---

૨૭ ૬. શુદ્ધોદક સ્નાનં (Pure water bath)

sprinkle water all around

મન્દાકિન્યાઃ સમાનીતં હેમામ્ભોરુહાવાસિતમ્ ।
સ્નાનાર્થે મય ભક્ત્યા નીરું સ્વીકુર્યતાં વિભો ॥

ૐ આપોહિષ્ટા મયો ભુવઃ । તાન ઊર્જે દધાતન ।
મહીરણાય ચક્ષસે । યોવઃ શિવતમોરસઃ તસ્યભાજયતે હનઃ ।
ઉશતીરિવ માતરઃ । તસ્માત્ અરંગમામવો । યસ્ય ક્ષયાય જિંવધ ।
આપો જન યથાચનઃ ॥

ૐ હરાય નમઃ । શુદ્ધોદક સ્નાનં સમર્પયામિ ॥

સકલ પૂજાર્થે અક્ષતાન્ સમર્પયામિ ॥

(after sprinkling water around throw one tulasi leaf to the north)

---

૨૮ મહા અભિષેકઃ

(Sound the bell, pour water from kalasha)

પુરુષ સૂક્ત

ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૧॥

પુરુષ એવેદગું સર્વમ્ યદ્ભૂતં યચ્છ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનઃ યદન્નેનાતિરોહતિ ॥ ૨॥

એતાવાનસ્ય મહિમા અતો જ્યાયાગંશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥ ૩॥

ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ પાદોઽસ્યેહાભવાત્પુનઃ ।
તતો વિશ્વઙ્વ્યક્રામત્ સાશનાનશને અભિ ॥ ૪॥

તસ્માદ્વિરાડજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિ મથો પુરઃ ॥ ૫॥

યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યમ્ ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ ॥ ૬॥

સપ્તાસ્યાસન્ પરિધયઃ ત્રિસ્સપ્ત સમિધઃ કૃતાઃ ।

દેવા યદ્યજ્ઞં તન્વાનાઃ અબધ્નન્ પુરુષં પશુમ્ ।

તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્ત સાધ્યા ઋષયશ્ચ યે ॥ ૭॥

તસ્માદ્યજ્ઞાત્સર્વહુતઃ સમ્ભૃતં પૃષદાજ્યમ્ ।
પશૂગુઁસ્તાગંશ્ચક્રે વાયવ્યાન્ આરણ્યાન્ ગ્રામ્યાશ્ચયે ॥ ૮॥

તસ્માદ્યજ્ઞાત્સર્વહુતઃ ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાઁગસિ જજ્ઞિરે તસ્માત્ યજુસ્તસ્માદજાયત ॥ ૯॥

તસ્માદશ્વા અજાયન્ત યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્ તસ્માજ્જાતા અજાવયઃ ॥ ૧૦॥

યત્પુરુષં વ્યદધુઃ કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ કાવૂરુ પાદાવુચ્યેતે ॥ ૧૧॥ (કિમૂરુ)

બ્રાહ્મણોસ્ય મુખમાસીત્ બાહૂ રાજન્યઃ કૃતઃ ।
ઉરુ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥ ૧૨॥

ચંદ્રમા મનસો જાતઃ ચક્ષોઃ સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ પ્રાણાદ્વાયુરજાયત ॥ ૧૩॥

નાભ્યા આસીદન્તરિક્ષમ્ શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ તથા લોકાંગ અકલ્પયન્ ॥ ૧૪॥

વેદાહમેતં પુરુષં મહાન્તમ્ આદિત્યવર્ણં તમસસ્તુ પારે ।
સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ નામાનિ કૃત્વાઽભિવદન્ યદાસ્તે ॥૧૫॥

ધાતા પુરસ્તાદ્યમુદાજહાર શક્રઃ પ્રવિદ્વાન્ પ્રદિશશ્ચતસ્રઃ ।
તમેવં વિદ્યાનમૃત ઇહ ભવતિ નાન્યઃ પન્થાયનાય વિદ્યતે ॥ ૧૬॥

યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્તે યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૧૭॥

ૐ શ્રી રુદ્રાય નમઃ । પુરુષસૂક્ત સ્નાનં સમર્પયામિ। ॥

બલાય શ્રિયૈ યશસેનદ્યાય અમૃતાભિષેકો અસ્તુ ।
શાન્તિઃ પુષ્ટિઃ તુષ્ટિશ્ચાસ્તુ ॥

ૐ પિનાકિને નમઃ । મહા અભિષેક સ્નાનં સમર્પયામિ ॥

ૐ નમઃ શિવાય । સ્નાનાનંતર આચમનીયં સમર્પયામિ ॥

---

૨૯ તર્પણં

(Offer water)

ૐ ભવ દેવં તર્પયામિ ।

ૐ શર્વં દેવં તર્પયામિ ।

ૐ ઈશાનં દેવં તર્પયામિ ।

ૐ પશુપતિં દેવં તર્પયામિ ।

ૐ ઉગ્રં દેવં તર્પયામિ ।

ૐ રુદ્રં દેવં તર્પયામિ ।

ૐ ભીમં દેવં તર્પયામિ ।

ૐ મહાન્તં દેવં તર્પયામિ ।

---

૩૦ પ્રતિષ્ઠાપના

ૐ નમઃ શિવાય ॥ (Repeat 12 times)

ૐ તદસ્તુ મિત્રા વરુણા તદગ્ને સમ્યોરશ્મભ્યમિદમેસ્તુશસ્તમ્ ।
અશીમહિ ગાદમુત પ્રતિષ્ઠાં નમો દિવે બ્રહતે સાધનાય ॥

ૐ ગ્રિહાવૈ પ્રતિષ્ઠાસૂક્તં તત્ પ્રતિષ્ટિત તમયા વાચા ।
શં સ્તવ્યં તસ્માદ્યદ્યપિદૂર ઇવ પશૂન્ લભતે ગૃહાનેવૈ ॥

નાનાજિગમિશતિ ગ્રિહાહિ પશૂનાં પ્રતિષ્ઠા પ્રતિષ્ઠા

ૐ શ્રી સામ્બસદાશિવાય સાંગાય સપરિવારાય સાયુધાય
સશક્તિકાય નમઃ । શ્રી સામ્બસદાશિવં સાંગં સપરિવારં
સાયુધં સશક્તિકં આવાહયામિ ॥

શ્રી ગૌરી સહિત શ્રી સામ્બસદાશિવાય નમઃ ॥

સુપ્રતિષ્ઠમસ્તુ ॥

---

૩૧ વસ્ત્ર

( offer two pieces of cloth for the Lord)

ૐ તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્ત સાધ્યા ઋષયશ્ચ યે ॥

વસ્ત્ર સૂક્ષ્મં દુકૂલં ચ દેવાનામપિ દુર્લભમ્ ।
ગૃહાણતં ઉમાકાન્ત પ્રસન્નો ભવ સર્વદા ॥

ૐ શિવાય નમઃ । વસ્ત્રયુગ્મં સમર્પયામિ

## ૩૨ શ્રી મહા ગૌરી પૂજા

### ૩૨.૧ કંચુકી

નવરત્નાભિર્દધાં સૌવર્ણૈશ્ચૈવ તંતુભિઃ ।
નિર્મિતાં કંચુકીં ભક્ત્યા ગૃહાણ પરમેશ્વરી ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ। કંચુકીં સમર્પયામિ ॥

### ૩૨.૨ કણ્ઠ સૂત્ર

માંગલ્ય તંતુમણિભિઃ મુક્તૈશ્ચૈવ વિરાજિતમ્ ।
સૌમાઙ્ગલ્ય અભિવૃધ્યર્થં કણ્ઠસૂત્રં દદામિ તે ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । કણ્ઠસૂત્રં સમર્પયામિ ॥

### ૩૨.૩ તાડપત્રાણિ

તાડપત્રાણિ દિવ્યાણિ વિચિત્રાણિ શુભાનિ ચ ।
કરાભરણયુક્તાનિ માતસ્તત્પ્રતિગૃહ્યતામ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ તાડપત્રાનિ સમર્પયામિ ॥

### ૩૨.૪ હરિદ્રા

હરિદ્રા રંજિતે દેવી સુખ સૌભાગ્ય દાયિની ।
હરિદ્રાંતે પ્રદાસ્યામિ ગૃહાણ પરમેશ્વરિ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । હરિદ્રા સમર્પયામિ ॥

૩૨.૫ કુઙ્કુમ

કુઙ્કુમં કામદાં દિવ્યં કામિની કામ સમ્ભવમ્ ।
કુઙ્કુમાર્ચિતે દેવિ સૌભાગ્યાર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । કુઙ્કુમં સમર્પયામિ ॥

૩૨.૬ કજ્જલ

સુનીલ ભ્રમરાભસં કજ્જલં નેત્ર મણ્ડનમ્ ।
મયાદત્તમિદં ભક્ત્યા કજ્જલં પ્રતિગૃહ્યતામ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । કજ્જલં સમર્પયામિ ॥

૩૨.૭ સિંદૂર

વિદ્યુત્ કૃશાનુ સઙ્કાશં જપા કુસુમસન્નિભમ્ ।
સિન્દૂરંતે પ્રદાસ્યામિ સૌભાગ્યં દેહિ મે ચિરમ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । સિન્દૂરં સમર્પયામિ ॥

૩૨.૮ નાના આભરણ

સ્વભાવા સુન્દરાંગિ ત્વં નાના રત્ન યુતાનિ ચ ।
ભૂષણાનિ વિચિત્રાણિ પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । નાના આભરણાનિ સમર્પયામિ ॥

૩૨.૯ નાના પરિમલ દ્રવ્યમ્

નાના સુગન્ધિકં દ્રવ્યં ચૂર્ણીકૃત્ય પ્રયત્નતઃ ।
દદામિ તે નમસ્તુભ્યં પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥

ૐ શ્રી મહા ગૌર્યૈ નમઃ । નાના પરિમલ દ્રવ્યં સમર્પયામિ ॥

---

૩૩ યજ્ઞોપવીતમ્

તસ્માદ્યજ્ઞાત્સર્વહુતઃ સમ્ભૃતં પૃષદાજ્યમ્ ।
પશૂગુંસ્તાગુંશ્ચક્રે વાયવ્યાન્  આરણ્યાન્ ગ્રામ્યાશ્ચયે ॥

યજ્ઞોપવીતં સહજં બ્રહ્મણં નિર્મિતં પુર ।
આયુષ્યં ભવ વર્ચસ્વમ્ ઉપવીતં ગૃહાણ મે ॥

ૐ શ્રી સર્વેશ્વરાય નમઃ । યજ્ઞોપવીતં સમર્પયામિ ॥

---

૩૪ આભરણં

ગૃહાણ નાનાભરણાનિ શમ્ભો મહેશ જમ્બૂનાદ નિર્મિતાનિ ।
લલાટ કણ્ઠોત્તમ કર્ણ હસ્ત નિતમ્બ હસ્તાંગુલિ ભૂષણાનિ ॥

ૐ શિવાય નમઃ । આભરણાનિ સમર્પયામિ ॥

---

૩૫ ગન્ધમ્

તસ્માદ્યજ્ઞાત્સર્વહુતઃ ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાँગુસિ જજ્ઞિરે તસ્માત્ યજુસ્તસ્માદજાયત ॥

ગન્ધં ગૃહાણ દેવેશ કસ્તૂરિ કુઙ્કુમાન્વિતમ્ ।
વિલેપનાર્થં કર્પૂરરોચન લોહિતં મયા ॥

ૐ શ્રી હરાય નમઃ । ગન્ધં સમર્પયામિ ॥

---

૩૬ નાના પરિમલ દ્રવ્યમ્

ૐ અહિરૈવ ભોગ્યૈઃ પર્યેતિ બાહું જાયા હેતિં પરિભાદમાનઃ ।
હસ્તઘ્નો વિશ્વાવયુનાનિ વિદ્વાન્પુમાસ્પ્રમાંસં પરિપાતુ વિશ્વતઃ ॥

ૐ શ્રી મહેશ્વરાય નમઃ । નાના પરિમલ દ્રવ્યં સમર્પયામિ ॥

---

૩૭ અક્ષત

તસ્માદશ્વા અજાયન્ત યે કે ચો ભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્ તસ્માજ્જાતા અજાવયઃ ॥

અક્ષતાન્ ધવલાન્ શુભ્રાન્ કર્પૂરાગુરુ મિશ્રિતાન્ ।
ગૃહાણ પરયા ભક્ત્યા મયા તુભ્યં સમર્પિતાન્ ॥

શ્રી શર્વાય નમઃ । અક્ષતાન્ સમર્પયામિ ॥

---

૩૮ પુષ્પ

બિલ્વાપમાર્ગ ધત્તૂર કરવીરાર્ક સમ્ભવૈઃ ।
બકોત્ફલદ્રોણ મુખ્યૈઃ પુષ્પૈ પૂજિત શંકર ॥

ૐ શ્રી ભવાય નમઃ । પુષ્પાણિ સમર્પયામિ ॥

---

૩૯ અથાઙ્ગપૂજાઃ

ૐ શિવાય નમઃ । પાદૌ પૂજયામિ ॥

ૐ વ્યોમાત્મને નમઃ । ગુલ્ફૌ પૂજયામિ ॥

ૐ અનન્તૈશ્વર્ય નાથાય નમઃ । જાનુની પૂજયામિ ॥

ૐ પ્રધાનાય નમઃ । જંઘે પૂજયામિ ॥

ૐ અનન્ત વિરાજસિંહાય નમઃ । ઊરૂન્ પૂજયામિ ॥

ૐ જ્ઞાન ભૂતાય નમઃ । ગુહ્યં પૂજયામિ ॥

ૐ સત્યસેવ્યાય નમઃ । જઘનં પૂજયામિ ॥

ૐ અનન્તધર્માય નમઃ । કટિં પૂજયામિ ॥

ૐ રુદ્રાય નમઃ । ઉદરં પૂજયામિ ॥

ૐ સત્યધરાય નમઃ । હૃદયં પૂજયામિ ॥

ૐ ઈશાય નમઃ । પાર્શ્વૌ પૂજયામિ ॥

ૐ તત્પુરુષાય નમઃ । પૃષ્ઠદેહં પૂજયામિ ॥

ૐ અઘોરહૃદયાય નમઃ । સ્કન્ધૌ પૂજયામિ ॥

ૐ વ્યોમકેશાત્મરૂપાય નમઃ । બાહૂન્ પૂજયામિ ॥

ૐ હરાય નમઃ । હસ્તાન્ પૂજયામિ ॥

ૐ ચતુર્ભાવવે નમઃ । કણ્ઠં પૂજયામિ ॥

ૐ વામદેવાય નમઃ । વદનં પૂજયામિ ॥

ૐ પિનાકહસ્તાય નમઃ । નાસિકાં પૂજયામિ ॥

ૐ શ્રીકણ્ઠાય નમઃ । શ્રોત્રે પૂજયામિ ॥

ૐ ઇન્દુમુખાય નમઃ । નેત્રાણિ પૂજયામિ ॥

ૐ હરયે નમઃ । ભ્રવૌ પૂજયામિ ॥

ૐ સદ્યોજાતવેદાય નમઃ । ભ્રૂમધ્યં પૂજયામિ ॥

ૐ વામદેવાય નમઃ । લલાટં પૂજયામિ ॥

ૐ સર્વાત્મને નમઃ । શિરઃ પૂજયામિ ॥

ૐ ચન્દ્રમૌલયે નમઃ । મૌલિં પૂજયામિ ॥

ૐ સદાશિવાય નમઃ । સર્વાઙ્ગાણિ પૂજયામિ ॥

---

૪૦ અથ પુષ્પ પૂજા

ૐ શર્વાય નમઃ । કરવીર પુષ્પં સમર્પયામિ ॥

ૐ ભવનાશનાય નમઃ । જાજી પુષ્પં સમર્પયામિ ॥

ૐ મહાદેવાય નમઃ । ચમ્પક પુષ્પં સમર્પયામિ ॥

ૐ ઉગ્રાય નમઃ । વકુલ પુષ્પં સમર્પયામિ ॥

ૐ ઉગ્રનાભાય નમઃ । શતપત્ર પુષ્પં સમર્પયામિ ॥

ૐ ભવાય નમઃ । કલ્હાર પુષ્પં સમર્પયામિ ॥

ૐ શશિમૌલિને નમઃ । સેવન્તિકા પુષ્પં સમર્પયામિ ॥

ૐ રુદ્રાય નમઃ । મલ્લિકા પુષ્પં સમર્પયામિ ॥

ૐ નીલકણ્ઠાય નમઃ । ઇરુવંતિકા પુષ્પં સમર્પયામિ ॥

ॐ શિવાય નમઃ । ગિરિકર્ણિકા પુષ્પં સમર્પયામિ ॥

ॐ ભવહારિણે નમઃ । આથસી પુષ્પં સમર્પયામિ ॥

બિલ્વાપમાર્ગ ધત્તૂર કરવીરાર્ક સમ્ભવૈઃ ।
બકોત્ફલદ્રોણ મુખ્યૈઃ પુષ્પૈ પૂજિત શંકર ॥

ભવાય નમઃ । નાનાવિધપુષ્પાણિ સમર્પયામિ ॥

## ૪૧ અથ પત્ર પૂજા

ॐ મહાદેવાય નમઃ । બિલ્વ પત્રં સમર્પયામિ ॥

ॐ મહેશ્વરાય નમઃ । જાજી પત્રં સમર્પયામિ ॥

ॐ શંકરાય નમઃ । ચમ્પકા પત્રં સમર્પયામિ ॥

ॐ વૃષભધ્વજાય નમઃ । તુલસી પત્રં સમર્પયામિ ॥

ॐ શૂલપાણિને નમઃ । દૂર્વા યુગ્મં સમર્પયામિ ॥

ॐ કામાઙ્ગ નાશનાય નમઃ । સેવંતિકા પત્રં સમર્પયામિ ॥

ॐ દેવદેવેશાય નમઃ । મરુગ પત્રં સમર્પયામિ ॥

ॐ શ્રીકણ્ઠાય નમઃ । દવન પત્રં સમર્પયામિ ॥

ॐ ઈશ્વરાય નમઃ । કરવીર પત્રં સમર્પયામિ ॥

ॐ પાર્વતીપતયે નમઃ । વિષ્ણુક્રાન્તિ પત્રં સમર્પયામિ ॥

ॐ રુદ્રાય નમઃ । માચિ પત્રં સમર્પયામિ ॥

ॐ સદાશિવાય નમઃ । સર્વપત્રાણિ સમર્પયામિ ।

## ૪૨ આવરણ પૂજા

### ૪૨.૧ પ્રથમાવરણ પૂજા

દેવસ્ય પશ્ચિમે સદ્યોજાતાય નમઃ ।
ઉત્તરે વામદેવાય નમઃ ।

દક્ષિણે અઘોરાય નમઃ ।

પૂર્વે તત્પુરુષાય નમઃ ।

ઊર્ધ્વં ઈશાનાય નમઃ ।

---

૪૨.૨ દ્વિતીયાવરણ પૂજા

આગ્નેય કોણે હૃદયાય નમઃ ।

ઈશાનકોણે શિરસે સ્વાહા ।

નૈરૃત્ય કોણે શિખાયૈ વૌષટ્ ।

વાયવ્ય કોણે કવચાય હુમ્ ।

અગ્રે નેત્રત્રયાય વૌષટ્ ।

દિક્ષુ અસ્ત્રાય ફટ્ ।

(right hand round the head and quickly sound a clap

- thus you close all directions)

---

૪૨.૩ તૃતીયાવરણ પૂજા

પ્રાચ્યાં અનન્તાય નમઃ ।

આવાચ્યાં સૂક્ષ્માય નમઃ ।

પ્રતીચ્યાં શિવોત્તમાય નમઃ ।

ઉદિચ્યાં એકનેત્રાય નમઃ ।

ઈશાન્યાં એકરુદ્રાય નમઃ ।

આગ્નેયાં ત્રૈ મૂર્તયે નમઃ ।

નૈરૃત્યાં શ્રીકણ્ઠાય નમઃ ।

વાયવ્યાં શિખન્દિને નમઃ ।

---

૪૨.૪ ચતુર્થાવરણ પૂજા

ઉત્તરે દિગ્દલે ઉમાયૈ નમઃ ।

ઈશાન દિગ્દલે ચણ્ડેશ્વરાય નમઃ ।

પૂર્વ દિગ્દલે નન્દીશ્વરાય નમઃ ।

આગ્નેય દિગ્દલે મહાકાલાય નમઃ ।

દક્ષિણ દિગ્દલે વૃષભાય નમઃ ।
નૈરૃત્ય દિગ્દલે ગણેશ્વરાય નમઃ ।
પશ્ચિમ દિગ્દલે ભૃંઘીશાય નમઃ ।
વાયવ્ય દિગ્દલે મહાસેનાય નમઃ ।

## ૪૨.૫ પંચમાવરણ પૂજા

ઇંદ્રાય નમઃ । અગ્નયે નમઃ ।
યમાય નમઃ । નૈરૃતયે નમઃ ।
વરુણાય નમઃ । વાયવ્યે નમઃ ।
કુબેરાય નમઃ । ઈશાનાય નમઃ ।
બ્રાહ્મણે નમઃ । અનંતાય નમઃ ।

## ૪૨.૬ ષષ્ઠાવરણ પૂજા

વજ્રાય નમઃ । શક્તયે નમઃ ।
દણ્ડાય નમઃ । ખડ્ગાય નમઃ ।
પાશાય નમઃ । અંકુશાય નમઃ ।
ગધાયૈ નમઃ । ત્રિશૂલાય નમઃ ।
પદ્માય નમઃ । ચક્રાય નમઃ ।

સર્વેભ્યો આવરણ દેવતાભ્યો નમઃ ।
સર્વોપચારાર્થે ગન્ધાક્ષત પુષ્પાણિ સમર્પયામિ ॥

## ૪૩ અષ્ટોત્તરશતનામ પૂજા

॥ ૐ ॥

શિવાય નમઃ । મહેશ્વરાય નમઃ ।
શમ્ભવે નમઃ । પિનાકિને નમઃ ।
શશિશેખરાય નમઃ । વામદેવાય નમઃ ।
વિરૂપાક્ષાય નમઃ । કપર્દિને નમઃ ।
નીલલોહિતાય નમઃ । શંકરાય નમઃ ।
શૂલપાણયે નમઃ । ખટ્વાંગિને નમઃ ।

વિષ્ણુવલ્લભાય નમઃ । શિપિવિષ્ટાય નમઃ ।
અમ્બિકાનાથાય નમઃ । શ્રીકણ્ઠાય નમઃ ।
ભક્તવત્સલાય નમઃ । ભવાય નમઃ ।
શર્વાય નમઃ । ત્રિલોકેશાય નમઃ ।
શિતિકણ્ઠાય નમઃ । શિવા પ્રિયાય નમઃ ।
ઉગ્રાય નમઃ । કપાલિને નમઃ ।
કામારયે નમઃ । અન્ધકાસુરસૂદનાય નમઃ ।
ગંગાધરાય નમઃ । લલાટાક્ષાય નમઃ ।
કાલકાલાય નમઃ । કૃપાનિધયે નમઃ ।
ભીમાય નમઃ । પરશુહસ્તાય નમઃ ।
મૃગપાણયે નમઃ । જટાધરાય નમઃ ।
કૈલાસવાસિને નમઃ । કવચિને નમઃ ।
કઠોરાય નમઃ । ત્રિપુરાન્તકાય નમઃ ।
વૃષાંકાય નમઃ । વૃષભારૂઢાય નમઃ ।
ભસ્મોદ્ધૂલિત વિગ્રહાય નમઃ । સામપ્રિયાય નમઃ ।
સ્વરમયાય નમઃ । ત્રયીમૂર્તયે નમઃ ।
અનીશ્વરાય નમઃ । સર્વજ્ઞાય નમઃ ।
પરમાત્મને નમઃ । સોમસૂર્યાગ્નિલોચનાય નમઃ ।
હવિષે નમઃ । યજ્ઞમયાય નમઃ ।
સોમાય નમઃ । પંચવક્ત્રાય નમઃ ।
સદાશિવાય નમઃ । વિશ્વેશ્વરાય નમઃ ।
વીરભદ્રાય નમઃ । ગણનાથાય નમઃ ।
પ્રજાપતયે નમઃ । હિરણ્યરેતસે નમઃ ।
દુર્ધર્ષાય નમઃ । ગિરીશાય નમઃ ।
ગિરિશાય નમઃ । અનઘાય નમઃ ।
ભુજંગભૂષણાય નમઃ । ભર્ગાય નમઃ ।
ગિરિધન્વને નમઃ । ગિરિપ્રિયાય નમઃ ।
કૃત્તિવાસસે નમઃ । પુરારાતયે નમઃ ।
ભગવતે નમઃ । પ્રમથાધિપાય નમઃ ।
મૃત્યુંજયાય નમઃ । સૂક્ષ્મતનવે નમઃ ।
જગદ્વ્યાપિને નમઃ । જગદ્ગુરુવે નમઃ ।
વ્યોમકેશાય નમઃ । મહાસેનજનકાય નમઃ ।

ચારુવિક્રમાય નમઃ । રુદ્રાય નમઃ ।
ભૂતપતયે નમઃ । સ્થાણવે નમઃ ।
અહયેબુધ્ન્યાય નમઃ । દિગમ્બરાય નમઃ ।
અષ્ટમૂર્તયે નમઃ । અનેકાત્મને નમઃ ।
સાત્વિકાય નમઃ । શુદ્ધવિગ્રહાય નમઃ ।
શાશ્વતાય નમઃ । ખણ્ડપરશવે નમઃ ।
અજ્ઞાય નમઃ । પાશવિમોચકાય નમઃ ।
મૃડાય નમઃ । પશુપતયે નમઃ ।
દેવાય નમઃ । મહાદેવાય નમઃ ।
અવ્યયાય નમઃ । હરયે નમઃ ।
ભગનેત્રભિદે નમઃ । અવ્યક્તાય નમઃ ।
દક્ષાધ્વરહરાય નમઃ । હરાય નમઃ ।
પૂષદન્તભિદે નમઃ । અવ્યગ્રાય નમઃ ।
સહસ્રાક્ષાય નમઃ । સહસ્રપદે નમઃ ।
અપવર્ગપ્રદાય નમઃ । અનન્તાય નમઃ ।
તારકાય નમઃ । પરમેશ્વરાય નમઃ ।

ઇતિ અષ્ટોત્તર પૂજાં સમર્પયામિ ॥

---

૪૪ ધૂપં

વનસ્પત્યુદ્ભવો દિવ્યો ગન્ધાઢ્યો ગન્ધવુત્તમઃ ।
આઘ્રેયઃ મહિપાલો ધૂપોયં પ્રતિગૃહ્યતામ્ ॥

યત્પુરુષં વ્યદધુઃ કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ કાવૂરુ પાદાવુચ્યેતે ॥

ૐ બલાય નમઃ । ૐ શિવાય નમઃ । ધૂપં આઘ્રાપયામિ ॥

---

૪૫ દીપં

દીપં હિ પરમં શમ્ભો ઘૃત પ્રજ્વલિતં મયા ।
દત્તં ગૃહાણ દેવેશ મમ જ્ઞાનપ્રદ ભવ ॥

ભક્ત્યા દીપં પ્રયશ્ચામિ દેવાય પરમાત્મને ।

ત્રાહિ માં નરકાત્ ઘોરાત્ દીપં જ્યોતિર્ નમોઽસ્તુતે ॥

બ્રાહ્મણોસ્ય મુખમાસીત્ બાહૂ રાજન્યઃ કૃતઃ ।
ઉરૂ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥

ૐ શ્રી બલપ્રમથનાય નમઃ । ૐ નમઃ શિવાય । દીપં દર્શયામિ ॥

---

૪૬ નૈવેદ્યં

(dip finger in water and write a square and
'shrI' mark inside the square. Place naivedya on
'shrI'. ; remove lid and sprinkle water around
the vessel; place in each food item one washed
leaf/flower/axatha)

ૐ સદાશિવાય વિદ્મહે મહાદેવાય ધીમહિ ।
તન્નો શંકર પ્રચોદયાત્ ॥

ૐ નમઃ શિવાય ॥

(show mudras)

નિર્વીષિકરણાર્થે તાર્ક્ષ મુદ્રા ।
અમૃતી કરણાર્થે ધેનુ મુદ્રા ।
પવિત્રીકરણાર્થે શઙ્ખ મુદ્રા ।
સંરક્ષાણાર્થં ચક્ર મુદ્રા ।
વિપુલમાયા કરણાર્થે મેરુ મુદ્રા ।

Touch naivedya and chant 9 times 'ૐ'

ૐ સત્યંતવર્તેન પરિસિઞ્ચામિ
(sprinkle water around the naivedya)

ભોઃ! સ્વામિન્ ભોજનાર્થં આગશ્ચાદિ વિજ્ઞાપ્ય
(request Lord to come for dinner)

સૌવર્ણે સ્થાલિવૈર્યે મણિગણકચિતે ગોધૃતાં
સુપક્વાં ભક્ષ્યાં ભોજ્યાં ચ લેહ્યાનપિ
સકલમહં જોષ્યમ્ન નીધાય નાના શાકૈ રૂપેતં

સમધુ દધિ ઘૃતં ક્ષીર પાણીય યુક્તં
તામ્બૂલં ચાપિ શિવં પ્રતિદિવસમહં મનસે ચિન્તયામિ ॥

અદ્ય તિષ્ઠતિ યત્કિઞ્ચિત્ કલ્પિતશ્ચાપરંગૃહે
પક્વાન્નં ચ પાનીયં યથોપસ્કર સંયુતં
યથાકાલં મનુષ્યાર્થે મોક્ષ્યમાનં શરીરિભિઃ
તત્સર્વં શિવપૂજાસ્તુ પ્રયતાં મે મહેશ્વર
સુધારસં સુવિફુલં આપોષણમિદં
તવ ગૃહાણ કલશાનીતં યથેષ્ટમુપ ભુજ્જ્યતામ્ ॥

ૐ નમઃ શિવાય । અમૃતોપસ્તરણમસિ સ્વાહા ॥

(drop water from sha.nkha)

ૐ પ્રાણાત્મને સ્વાહા ।
ૐ અપાનાત્મને સ્વાહા ।
ૐ વ્યાનાત્મને સ્વાહા ।
ૐ ઉદાનાત્મને સ્વાહા ।
ૐ સમાનાત્મને સ્વાહા ।

ૐ નમઃ શિવાય ।

નૈવેદ્યં ગૃહ્યતાં દેવ ભક્તિ મે અચલાં કુરુઃ ।
ઈપ્સિતં મે વરં દેહિ ઇહત્ર ચ પરાં ગતિમ્ ॥

શ્રી સદાશિવં નમસ્તુભ્યં મહા નૈવેદ્યં ઉત્તમમ્ ।
સંગૃહાણ સુરશ્રેષ્ઠ ભક્તિ મુક્તિ પ્રદાયકમ્ ॥

નૈવેદ્યં સમર્પયામિ ॥

(cover face with cloth and chant ગાયત્રી મંત્ર
five times or repeat 12 times ૐ નમઃ શિવાય )

સર્વત્ર અમૃતોપિધાન્યમસિ સ્વાહા ।
ૐ નમઃ શિવાય । ઉત્તરાપોષણં સમર્પયામિ ॥

(Let flow water from sha.nkha)

૪૭ મહા ફલં

(put tulsi / axathA on a big fruit)

ઇદં ફલં મયાદેવ સ્થાપિતં પુરતસ્તવ ।
તેન મે સફલાવાપ્તિર્ ભવેત્ જન્મનિ જન્મનિ ॥

ૐ શિવાય નમઃ । મહાફલં સમર્પયામિ ।

---

૪૮ ફલાષ્ટક
(put tulsi/axata on fruits)

કૂષ્માણ્ડ માતુલિઙ્ગં ચ નારિકેલફલાનિ ચ ।
ગૃહાણ પાર્વતીકાન્ત સોમેશ પ્રતિગૃહ્યતામ્ ॥

ૐ કેદારેશ્વરાય નમઃ । ફલાષ્ટકં સમર્પયામિ ॥

---

૪૯ કરોદ્વર્તનમ્

કરોદ્વર્તન્કં દેવમયા દત્તં હિ ભક્તિતઃ ।
ચારુ ચંદ્ર પ્રભાં દિવ્યાં ગૃહાણ જગદીશ્વર ॥

ૐ શ્રી શંકરાય નમઃ ।
કરોદ્વર્તનાર્થે ચંદનં સમર્પયામિ ॥

---

૫૦ તામ્બૂલં

પૂગિફલં સતામ્બૂલં નાગવલ્લિ દલૈર્યુતમ્ ।
તામ્બૂલં ગૃહ્યતાં દેવ યેલ લવઙ્ગ સંયુક્તમ્ ॥

ૐ મનોન્મયાય નમઃ । પૂગિફલ તામ્બૂલં સમર્પયામિ ॥

---

૫૧ દક્ષિણા

હિરણ્ય ગર્ભ ગર્ભસ્થ હેમબીજ વિભાવસોઃ ।
અનંત પુણ્ય ફલદા અથઃ શાંતિં પ્રયશ્ચ મે ॥

ૐ શ્રી શિવાય નમઃ । સુવર્ણ પુષ્પ દક્ષિણાં સમર્પયામિ ॥

પ૨ મહા નીરાજન

ચક્ષુર્દાં સર્વલોકાનાં તિમિરસ્ય નિવારણમ્ ।
અર્થિક્યં કલ્પિતં ભક્ત્યા ગૃહાણ પરમેશ્વર ॥

શ્રીયૈ જાતઃ શ્રિય અનિરિયાય શ્રિયં વયો જરિત્રભ્યો દદાતિ
શ્રિયં વસાના અમૃતત્ત્વ માયન્ ભવંતિ સત્યા સમિધા મિતદ્રૌ
શ્રિય યેવૈનં તત્ શ્રિયા માદધાતિ સંતત મૃચા વષટ્કૃત્યં
સંતતં સંધીયતે પ્રજયા પશુભિઃ યયેવં વેદ ॥

ૐ નમઃ શિવાય । મહાનીરાજનં દીપં સમર્પયામિ ॥

પ૩ કર્પૂર દીપ

અર્ચત પ્રાર્ચત પ્રિય મે દાસો અર્ચત ।
અર્ચન્તુ પુત્ર કા વતપુરન્ન ધૃષ્ણ વર્ચત ॥

કર્પૂરકં મહારાજ રમ્ભોદ્ભૂતં ચ દીપકમ્ ।
મઙ્ગલાર્થં મહીપાલ સઙ્ગૃહાણ જગત્પતે ॥

ૐ નમઃ શિવાય। કર્પૂર દીપં સમર્પયામિ ॥

પ૪ પ્રદક્ષિણા

નાભ્યા આસીદન્તરિક્ષમ્ શીષ્ર્ણો દ્યૌઃ સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ તથા લોકાંગ અકલ્પયન્ ॥

યાનિ કાનિ ચ પાપાનિ જન્માંતર કૃતાનિ ચ ।
તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણે પદે પદે ॥

પ્રદક્ષિણ ત્રિયં દેવ પ્રયત્નેન મયા કૃતમ્ ।
તેન પાપાણિ સર્વાણિ વિનાશાય નમોઽસ્તુતે ॥

ૐ નમઃ શિવાય । પ્રદક્ષિણાન્ સમર્પયામિ ॥

પપ નમસ્કાર

સપ્તાસ્યાસન્ પરિધયઃ ત્રિસ્સપ્ત સમિધઃ કૃતાઃ ।
દેવા યદ્યજ્ઞં તન્વાનાઃ અબધ્નન્પુરુષં પશુમ્ ॥

નમસ્તે સર્વલોકેશ નમસ્તે જગદીશ્વર ।
નમસ્તેઽસ્તુ પર બ્રહ્મ નમસ્તે પરમેશ્વર ॥

હેતવે જગતાવેવ સંસારાર્ણવ સેતવે ।
પ્રભવે સર્વવિદ્યાનાં શમ્ભવે ગુરુવે નમઃ ॥

નમો નમો શમ્ભો નમો નમો જગત્પતે ।
નમો નમો જગત્સાક્ષિણ્ નમો નમો નિરઞ્જન ॥

નમોઽસ્તુતે શૂલપાણે નમોઽસ્તુ વૃષભધ્વજ ।
જીમૂતવાહન કરે સર્વ ત્ર્યમ્બક શંકર ॥

મહેશ્વર હરેશાન સુવનાક્ષ વૃષાકપે ।
દક્ષ યજ્ઞ ક્ષયકર કાલ રુદ્ર નમોઽસ્તુતે ॥

ત્વમાદિરસ્યજગત્ ત્વં મધ્યં પરમેશ્વર ।
ભવાનંતશ્ચ ભગવન્ સર્વગસ્ત્વયં નમોઽસ્તુતે ॥

પૂર્વે શર્વાય કીર્તિમૂર્તયે નમઃ ।
ઈશાન્યાં ભવાય જલમૂર્તયે નમઃ ।
ઉત્તરે રુદ્રાય અગ્નિમૂર્તયે નમઃ ।
વાયુવ્યાં ઉગ્રાય વાયુમૂર્તયે નમઃ ।
પશ્ચિમે ભીમાય આકાશમૂર્તયે નમઃ ।
નૈરૃત્યાં પશુપતયે યજમાન મર્દયે નમઃ।
દક્ષિણે મહાદેવાય સોમમૂર્તયે નમઃ ।
આગ્નેયાં ઈશાનાય સૂર્યમૂર્તયે નમઃ ॥

ૐ નમઃ શિવાય । નમસ્કારાન્ સમર્પયામિ ॥

---

પ૬ રાજોપચાર

ગૃહાણ પરમેશાન સરત્ને છત્ર ચામરે ।
દર્પણં વ્યઞ્જનં ચૈવ રાજભોગાય યત્નથઃ ॥

ૐ ચન્દ્રશેખરાય નમઃ । છત્રં સમર્પયામિ ।

ૐ વ્યોમકેશાય નમઃ । ચામરં સમર્પયામિ ।

ૐ વિશ્વાત્મને નમઃ । ગીતં સમર્પયામિ ।

ૐ સોમમૂર્તયે નમઃ । નૃત્યં સમર્પયામિ ।

ૐ વિશ્વમૂર્તયે નમઃ । વાદ્યં સમર્પયામિ ।

ૐ ગમ્ભીરનાદાય નમઃ । દર્પણં સમર્પયામિ ।

ૐ મૃગપાણયે નમઃ । વ્યઞ્જનં સમર્પયામિ ।

ૐ ભુજંગનાથાય નમઃ । આન્દોલનં સમર્પયામિ ।

ૐ ત્રિકાલાગ્નિનેત્રાય નમઃ । રાજોપચારાન્ સમર્પયામિ ।

ૐ સર્વવ્યાપિને નમઃ । સર્વોપચારાન્ સમર્પયામિ ।

---

૫૭ મંત્ર પુષ્પ

યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્તે યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥

યઃ શુચિઃ પ્રયતો ભૂત્વા જુહુયાદાજ્યમન્વહમ્ ।
સૂક્તં પઞ્ચદશર્ચં ચ શ્રીકામઃ સતતં જપેત્ ॥

વિદ્યા બુદ્ધિ ધનૈશ્વર્ય પુત્ર પૌત્રાદિ સમ્પદઃ ।
પુષ્પાંજલિ પ્રદાનેન દેહિમે ઈપ્સિતં વરમ્ ॥

નમોઽસ્ત્વનંતાય સહસ્ર મૂર્તયે સહસ્રપાદાક્ષિશિરોરુ બાહવે ।
સહસ્રનામ્ને પુરુષાય શાશ્વતે સહસ્રકોટી યુગધારિણે નમઃ ॥

ૐ નમો મહદ્ભ્યો નમો અર્ભકેભ્યો નમો યુવભ્યો નમો આસીનેભ્યઃ ।
યજાં દેવાન્ય દિશક્રવા મમા જાયસઃ શં સમાવૃક્ષિદેવ ॥

ૐ મમત્તુનઃ પરિજ્ઞાવસરઃ મમત્તુ વાતો અપાં વ્રશન્વાન્ ।
શિશીતમિન્દ્રા પર્વતા યુવન્નસ્થન્નો વિશ્વેવરિવસ્યન્તુ દેવાઃ ॥

ૐ કથાત અગ્ને શુચીયંત અયોર્દદાશુર્વાજે ભિરાશુશાનઃ ।
ઉભેયત્તોકેતનયે દધાના ઋતસ્ય સામનૃણયંત દેવાઃ ॥

ૐ રાજાધિ રાજાય પ્રસહ્ય સાહિને નમો વયં વૈશ્રવણાય
કૂર્મહે સમે કામાન્ કામ કામાય મહ્યં કામેશ્વરો
વૈશ્રવણો દધાતુ કુબેરાય વૈશ્રવણાય મહારાજાય નમઃ ॥

ૐ સ્વસ્તિ સામ્રાજ્યં ભોજ્યં સ્વારાજ્યં વૈરાજ્યં
પારમેષ્ઠાં રાજ્યં મહારાજ્યમાધિપત્યમયં સમંત
પર્યાયિસ્યાત્ સાર્વ ભોંઅઃ સાર્વાયુશઃ અંતાદા
પરાર્ધાત્ પૃથિવ્યૈ સમુદ્ર પર્યન્તાય એકરાલિતિ તદપ્યેશ
શ્લોકોભિગીતો મરૂતઃ પરિવેષ્ટારો મરુતસ્યા વસન્ગૃહે
આવીક્ષિતસ્ય કામપ્રેર્વિશ્વેદેવા સભાસદ ઇતિ ॥

શ્રી સામ્બસદાશિવાય નમઃ । મંત્રપુષ્પં સમર્પયામિ ॥

---

૫૮ ક્ષમાપણં

યત્કિંચિત્ કુર્મહે દેવ સદ સુકૃત્દુષ્કૃતમ્ ।
તન્મે શિવપાદસ્ય ભુંક્ષવક્ષપય શંકર ॥

કરચરણકૃતં વા કાયજં કર્મજં વા ।
શ્રવણ નયનજં વા માનસં વાપરાધમ્ ॥

વિહિતમવહિતં વા સર્વમેતત્ ક્ષમસ્વ ।
જય જય કરુણાબ્ધે શ્રી મહાદેવ શમ્ભો ॥

---

૫૯ પ્રાર્થના

નમોવ્યક્તાય સૂક્ષ્માય નમસ્તે ત્રિપુરાન્તક ।
પૂજાં ગૃહાણ દેવેશ યથાશક્ત્યુપપાદિતામ્ ॥

કિં ન જાનાસિ દેવેશ ત્વયી ભક્તિં પ્રયશ્ચ મે ।
સ્વપાદાગ્રતલે દેવ દાસ્યં દેહિ જગત્પતે ॥

બદ્ધોહં વિવિદ્ધૈ પાશૈ સંસારુભયબંધનૈ ।
પતિતં મોહજાલે મં ત્વં સમુધ્ધર શંકર ॥

પ્રસન્નો ભવ મે શ્રીમન્ સદ્ગતિઃ પ્રતિપાદ્યતામ્ ।
ત્વદાલોકન માત્રેણ પવિત્રોઽસ્મિન સંશયઃ ॥

ત્વદન્ય શરણ્યઃ પ્રપન્નસ્ય નેતિ ।
પ્રસીદ સ્મરન્નેવ હન્યાસ્તુ દૈન્યમ્ ॥

નચેત્તે ભવેદ્ભક્તિ વાત્સલ્ય હાનિ ।

સ્તતો મે દયાલો દયાં સન્નિદેહિ ॥

સકારણમશેષસ્ય જગતઃ સર્વદા શિવઃ ।
ગો બ્રાહ્મણ નૃપાણાં ચ શિવં ભવતુ મે સદા ॥

---

૬૦ શઙ્ખ બ્રામણ

(make three rounds of sha.nkha with
water like Arati and pour down;
chant OM 9 times and show mudras)

ઇમાં આપશિવતમ ઇમં સર્વસ્ય ભેષજે ।
ઇમાં રાષ્ટ્રસ્ય વર્ધિનિ ઇમાં રાષ્ટ્ર ભ્રતોમત ॥

---

૬૧ તીર્થ પ્રાશ્ન

લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાજયઃ ।
યેષાં ઇન્દીવર શ્યામો હૃદયસ્તો જનાર્દનઃ ॥

અકાલ મૃત્યુ હરણં સર્વ વ્યાધિ નિવારણમ્ ।
સર્વ પાપ ઉપશમનં શિવ પાદોદકં શુભમ્ ॥

---

૬૨ વિસર્જન પૂજા

આરાધિતાનાં દેવતાનાં પુનઃ પૂજાં કરિષ્યે ॥

ૐ નમઃ શિવાય ॥

પૂજાંતે છત્રં સમર્પયામિ । ચામરં સમર્પયામિ ।
નૃત્યં સમર્પયામિ । ગીતં સમર્પયામિ ।
વાદ્યં સમર્પયામિ । આંદોલિક આરોહણં સમર્પયામિ ।
અશ્વારોહણમ્ સમર્પયામિ । ગજારોહણં સમર્પયામિ ।

શ્રી સામ્બસદાશિવાય નમઃ ।

સમસ્ત રાજોપચાર દેવોપચાર શક્ત્યુપચાર ભક્ત્યુપચાર
પૂજાં સમર્પયામિ ॥

૬૩ આત્મ સમર્પણ

નિત્યં નૈમિત્તિકં કામ્યં યત્કૃતં તુ મયા શિવ ।
તત્ સર્વં પરમેશાન મયા તુભ્યં સમર્પિતમ્ ॥

મંત્રહીનં ક્રિયાહીનં ભક્તિહીનં જનાર્દન ।
યત્પૂજિતં મયાદેવ પરિપૂર્ણં તદસ્તુ મે ॥

આવાહનં ન જાનામિ, ન જાનામિ વિસર્જનમ્ ।
પૂજાવિધિં ન જાનામિ ક્ષમસ્વ પુરુષોત્તમ ॥

અપરાધ સહસ્રાણિ ક્રિયન્તે અહર્નિશં મયા ।
તાનિ સર્વાણિ મે દેવ ક્ષમસ્વ પુરુષોત્તમ ॥

વર્તમાને બહુદાન્ય નામ સંવત્સરે માગ માસે કૃશણ પક્ષે
ત્રયોદસિ તિથૌ શ્રી સામ્બસદાશિવ પ્રેરણયા શ્રી
સામ્બસદાશિવ પ્રીત્યર્થં અનેન મયા ચરિત શિવરાત્રિ
વ્રતે શ્રી સદાશિવ પૂજારાધનેન
ભગવાન્ શ્રી શંકરઃ પ્રીયતામ્ ॥

ૐ તત્સત્

॥ શ્રી સદાશિવાર્પણમસ્તુ ॥

૬૪ અર્ઘ્યપ્રદાનં

શ્રી સામ્બસદાશિવ પ્રેરણયા શ્રી સામ્બસદાશિવ પ્રીત્યર્થં
શિવરાત્રિ વ્રત સમ્પૂર્ણ ફલ પ્રાપ્યર્થં ચ અર્ઘ્ય પ્રદાનં કરિષ્યે।

વ્યોમકેશ નમસ્તુભ્યં વ્યોમાત્મા વ્યોમરૂપિણે ।
નક્ષત્રરુપિણે તુભ્યં દદામ્યર્ઘ્યં નમોઽસ્તુતે ।
શ્રી શિવાય નમઃ ।
તારકલિંગાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

કૈલાશ નિલય શમ્ભો પાર્વતી પ્રિય વલ્લભ ।
ત્રૈલોક્યતમવિધ્વંસિન્ ગૃહાણર્ઘ્યં સદાશિવ ॥

શ્રી શિવાય નમઃ ।

સદાશિવાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

કાલરુદ્ર શિવ શમ્ભો કાલાત્મન્ ત્રિપુરાંતક ।
દુરિતઘ્ન સુરશ્રેષ્ઠ ગૃહાણર્ઘ્યં સદાશિવ ॥

શ્રી શિવાય નમઃ ।
સદાશિવાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

આકાશાદ્યાશરીરાણિ ગૃહનક્ષત્રમાલૈનિ ।
સર્વ સિદ્ધિ નિવાસાર્તં દદામર્ઘ્યં સદાશિવ ॥

શ્રી શિવાય નમઃ ।
સદાશિવાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

ઉમાદેવી શિવાર્ધાઙ્ગી જગન્માતૃ ગુણાત્મિકે ।
ત્રાહિ માં દેવિ સર્વેષિ ગૃહાણાર્ઘ્યં નમોઽસ્તુતે ॥

શ્રી પાર્વત્યૈ નમઃ ।
પાર્વત્યૈ ઇદમર્ઘ્યં દત્તં ન મમ ॥

શ્રી ગુણાત્મન્ ત્રિલોકેશઃ બ્રહ્મા વિષ્ણુ શિવાત્મક ।
અર્ઘ્યં ચેદં મયા દત્તં ગૃહાણ ગણનાયક। ॥

શ્રી ગણપતયે નમઃ ।
ગણપતયે ઇદમર્ઘ્યં દત્તં ન મમ ॥

સેનાધિપ સુરશ્રેષ્ઠ પાર્વતી પ્રિયનન્દન ।
ગૃહાણર્ઘ્યં મયા દત્તં નમસ્તે શિખિવાહન ।
શ્રી સ્કન્દાય નમઃ ।
સ્કન્દાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

વીરભદ્ર મહાવીર વિશ્વ જ્ઞાન વર પ્રદ ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સંગ્રહાણ શિવપ્રિય ॥

શ્રી વીરભદ્રાય નમઃ ।
વીરભદ્રાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

ધર્મસ્ત્વં વૃષ રૂપેણ જગદાનન્દકારક ।
અષ્ટમૂર્તેરધિષ્ઠાનં અથઃ પાહિ સનાતન ।
શ્રી વૃષભાય નમઃ ।

વૃષભાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

ચણ્ડીશ્વર મહાદેવ ત્રાહિ મામ્ કૃપયાકાર ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ પ્રસન્ના વરદા ભવ ।
શ્રી ચણ્ડીશ્વરાય નમઃ ।
ચણ્ડીશ્વરાય ઇદમર્ઘ્યં દત્તં ન મમ ॥

અનેન શિવરાત્રિ વ્રતાંગત્વેન અર્ઘ્યપ્રદાનેન ભગવન્
શ્રી સદાશિવ પ્રીયતામ્ ।
ૐ તત્સત્
શ્રી સદાશિવાર્પણમસ્તુ ॥

યાન્તુ દેવ ગણાઃ સર્વે પૂજાં આદાય પર્તિવીમ્ ।
ઇષ્ટ કામ્યાર્થ સિધ્યર્થં પુનરાગમનાય ચ ॥

(Shake the kalasha)

Text by Sri S. A. Bhandarkar (achkumg3 at batelco.com.bh); Modified for ITRANS; Transliterated by Sowmya Ramkumar (ramkumar at batelco.com.bh)
Last updated on ત્oday

*shrI shiva pUjA*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*